**Series JBB**

**SET-4**

कोड नं.
Code No. **52**

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

| नोट | NOTE |
|---|---|
| (I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं । | (I) Please check that this question paper contains **19** printed pages. |
| (II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें । | (II) Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं । | (III) Please check that this question paper contains **18** questions. |
| (IV) कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें । | (IV) Please write down the Serial Number of the question in the answer-book before attempting it. |
| (V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे । | (V) 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period. |

# संस्कृतम्

# SANSKRIT

*अवधिः : होरात्रयम्* — *पूर्णाङ्काः : 80*

*निर्धारित समय : 3 घण्टे* — *अधिकतम अंक : 80*

*Time allowed : 3 hours* — *Maximum Marks : 80*

| | | |
|---|---|---|
| खण्डः क : | अपठितांश-अवबोधनम् (अपठितांश-अवबोधन) | 10 अङ्काः |
| SECTION A : | Unseen Reading Comprehension | |
| खण्डः ख : | रचनात्मककार्यम् (रचनात्मक-कार्य) | 15 अङ्काः |
| SECTION B : | Writing Skills | |
| खण्डः ग : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 25 अङ्काः |
| SECTION C : | Applied Grammar | |
| खण्डः घ : | पठित-अवबोधनम् (पठित-अवबोधन) | 30 अङ्काः |
| SECTION D : | Reading Comprehension | |

***निर्देशाः :***

***Instructions :***

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।*
*इस प्रश्न-पत्र में चार खण्ड हैं ।*
*The question paper has four sections.*

*(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।*
*The answers to each section must be written at one place.*

*(iii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*
*प्रश्न-पत्र के अनुसार प्रश्न संख्या अवश्य ही लिखनी होगी ।*
*Write the question number according to the question paper.*

*(iv)* *सर्वेषां प्रश्नानाम् उत्तराणि **संस्कृतेन** लेखनीयानि ।*
*सभी प्रश्नों के उत्तर **संस्कृत** में लिखिए ।*
*Answer all the questions in **Sanskrit**.*

## खण्डः क (SECTION A)

## अपठितांश-अवबोधनम् (अपठितांश-अवबोधन)

## Unseen Reading Comprehension

10 अङ्काः

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following prose passage and write the answer of the given questions in Sanskrit. *10*

वर्तमानयुगं सङ्गणकयुगम् अस्ति । अद्यत्वे सङ्गणकस्य प्रयोगः प्रत्येकं क्षेत्रे वर्तते । अद्य नवीनैः वैज्ञानिकैः आविष्कृतेषु साधनेषु सङ्गणकयन्त्रम् अतिमहत्त्वपूर्णम् उपयोगि च अस्ति । जनानां मस्तिष्के ये विचाराः स्मृतिरूपेण स्थाप्यन्ते ते एकस्मिन् एव सङ्गणकयन्त्रे दत्तांशरूपेण (data) क्रूडीकर्तुं (coding) शक्यन्ते । अतः सम्प्रति काले सङ्गणकयन्त्रस्य गरिमा दिने दिने वर्धमाना अस्ति । सङ्गणकयन्त्रे अत्यन्तं प्रमुखाः बहूपयोगिनः च विषयाः संगृहीताः भवन्ति । यदि क्रिमिप्रवेशेन (virus) सङ्गणकयन्त्रं दोषपूर्णं भवति चेत् तर्हि दत्तांशाः पुनः न लभन्ते । इमं दोषं निवारयितुं नूतनं तन्त्रज्ञानम् अधुना 'सेफ्टी टेक्नोलॉजी' इति संस्थया अभिवर्धितम् । सङ्गणकयन्त्रमेव विनष्टं चेदपि अन्तर्जालद्वारा (internet) विश्वेऽस्मिन् यत्र कुत्रापि ते अंशाः पुनर्ग्रहीतुं शक्यन्ते ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) *1×2=2*

(i) कस्य गरिमा दिने दिने वर्धमाना अस्ति ?

(ii) क्रिमिप्रवेशं निवारयितुं का संस्था अस्ति ?

(iii) सङ्गणकयन्त्रम् अद्य कैः वैज्ञानिकैः आविष्कृतम् ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×2=4*

(i) जनानां मस्तिष्के विचाराः केन रूपेण स्थाप्यन्ते ?

(ii) केन सङ्गणकयन्त्रं दोषपूर्णं भवति ?

(iii) केन विनष्टाः अंशा पुनर्ग्रहीतुं शक्यन्ते ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write the appropriate title for this passage in Sanskrit. *1*

(द) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्)

निर्देशानुसार उत्तर दीजिए । (केवल तीन प्रश्न)

Answer according to instructions. (Only three questions) *1×3=3*

(i) 'अस्ति' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

(क) विचाराः

(ख) सङ्गणकयन्त्रम्

(ग) विषयः

(ii) 'नूतनम् तन्त्रज्ञानम्' अनयोः पदयोः विशेषणं किम् ?

(क) नूतनम्

(ख) प्राचीनम्

(ग) तन्त्रज्ञानम्

(iii) 'इन्टरनेट' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

(क) सङ्गणकम्

(ख) संकलनम्

(ग) अन्तर्जालम्

(iv) अनुच्छेदे 'पुरातनं' पदस्य कः विपर्ययः आगतः ?

(क) रत्नं

(ख) नूतनं

(ग) विनष्टम्

## खण्डः ख (SECTION B)

## रचनात्मककार्यम् (रचनात्मक-कार्य)

## Writing Skills

15 अङ्काः

**2.** अग्रजं प्रति लिखितम् अधः पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत ।
अग्रज को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कर पुनः लिखिए ।
Complete the following letter written to your elder brother, with the help of the words given in the box and rewrite the same. $\frac{1}{2}\times 10=5$

(i) ______________

दिनाङ्कः ____________

(ii) ______________

प्रणामाः ।

अहमत्र (iii) ____________, भवान् अपि तत्र कुशली अस्ति इति मन्ये । मातापितरौ तु सर्वदा त्वां (iv) ___________ । तवाग्रजा आगामिमासे रक्षाबन्धनपर्वणि गृहम् (v) ____________ । भवान् अपि (vi) _____________ आगच्छतु । अस्मिन् विषये तवाग्रजा अपि त्वां पत्रं (vii) ______________ । भवतः अध्ययनं (viii) __________ चलति इति वयं चिन्तयामः । अन्यत् सर्वं (ix) ___________ । सर्वेभ्यः मित्रेभ्यः मदीयाः शुभकामनाः ।

भवतः (x) ______________

कुलदीपः

**मञ्जूषा**

| |
|---|
| लेखिष्यति, दिल्लीतः, कुशली, सम्यक्, प्रिय अग्रज !, आगमिष्यति, कुशलम्, अनुजः, स्मरतः, अवश्यम् । |

**3.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत ।
नीचे दिए गए चित्र को देखकर मञ्जूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में वर्णन कीजिए ।
Describe the following picture in **five** Sanskrit sentences with the help of the words given in the box below. *1×5=5*



**मञ्जूषा**

| |
|---|
| उद्याने, बालकाः, बालिकाः, भ्रमन्ति, इतस्ततः, स्त्रियः, दोलाः, बालकेन, शिशवः, सह, वृक्षाः, क्रीडन्ति, परस्परं, बहवः । |

**अथवा (OR)**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।
मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए ।
Write a paragraph in **five** Sanskrit sentences on the following topic with the help of the words given in the box. *1×5=5*

**'विद्याधनं सर्वधनप्रधानम्'**

**मञ्जूषा**

| |
|---|
| विद्या, आवश्यकता, ज्ञानम्, बुद्धिम्, विद्यायाः, पशुः, विकासयति, धनम्, लोके, विद्याविहीनः, नाम, मानवस्य । |

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत । (केवलं वाक्यपञ्चकम्)

निम्नलिखित वाक्यों को संस्कृत भाषा में अनुवाद करके लिखिए । (केवल पाँच वाक्य)

Translate into Sanskrit and write the following sentences.

(Only five sentences) *1×5=5*

(i) पिता दूध लाता है ।
Father brings milk.

(ii) तुम दोनों संस्कृत पढ़ते हो ।
Both of you read Sanskrit.

(iii) कल रमेश पाटलिपुत्र जाएगा ।
Tomorrow Ramesh will go to Patliputra.

(iv) सुधा कहाँ थी ?
Where was Sudha ?

(v) तुम सब कक्षा में पढ़ो ।
All of you read in the classroom.

(vi) कुत्ता बाघ से डरता है ।
The dog fears from the tiger.

(vii) क्या मैं बाहर जाऊँ ?
May I go out ?

## खण्डः ग (SECTION C)

## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

## Applied Grammar

25 अङ्काः

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत ।

(केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धि-विच्छेद करके लिखिए ।

(केवल चार प्रश्न)

Write the underlined words of the following sentences after joining or disjoining Sandhi's. (Only four questions) *1×4=4*

(i) सर्वदा <u>सत् + मार्गे</u> गच्छ ।

(ii) सम्बन्ध-<u>विच्छेदः</u> न करणीयः ।

(iii) <u>हरिम् + वन्दे</u> जगद्गुरुम् ।

(iv) गावश्च गोभिः <u>तुरङ्गास्तुरङ्गैः</u> ।

(v) रमणीया हि <u>सृष्टिः + एषा</u> ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत ।
(केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए । (केवल चार प्रश्न)

Choose and write the correct compound or expounded forms of the underlined words of the following sentences. (Only four questions) *1×4=4*

(i) स्थितप्रज्ञः इति को न जानाति ।

(क) स्थितं प्रज्ञं यस्य सः

(ख) स्थितः प्रज्ञः

(ग) स्थिता प्रज्ञा यस्य सः

(ii) नास्ति उद्यमसमः बन्धुः ।

(क) उद्यमाय समः

(ख) उद्यमात् समः

(ग) उद्यमेन समः

(iii) पिककाकौ उड्डीयेते ।

(क) पिकः च काकाः च

(ख) पिकः च काकः च

(ग) काकः पिकः च

(iv) यथाशक्ति एकः वानरः पक्षिणः तुदति स्म ।

(क) शक्तेः योग्यम्

(ख) शक्तिम् यथा

(ग) शक्तिम् अनतिक्रम्य

(v) रामः मृगस्य पश्चात् धावति स्म ।

(क) अनुमृगम्

(ख) समृगम्

(ग) उपमृगम्

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितं उत्तरं विकल्पेभ्य: चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में रेखांकित पदों में प्रकृति-प्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों से चुनकर लिखिए । (केवल चार प्रश्न)

Write the underlined words of the following sentences after joining or disjoining suffixes to roots or words, selecting the correct answer from the options given below. (Only four questions) *1×4=4*

(i) शतादीनां सहिष्णुता ।

(क) सहिष्णु + त्व

(ख) सहिष्णु + तल्

(ग) सहिष्णु + मतुप्

(ii) स्थिरत्वं लाघवं मृजा ।

(क) स्थिर + मतुप्

(ख) स्थिर + टाप्

(ग) स्थिर + त्व

(iii) व्याघ्रजाद् भयात् बुद्धिमती ।

(क) बुद्धिमत् + ङीप्

(ख) बुद्धिमान् + टाप्

(ग) बुद्धिमती + ङीप्

(iv) सुश्रुतः एकः श्रेष्ठः धार्मिकः आसीत् ।

(क) धर्म + ठक्

(ख) धर्म + घञ्

(ग) धार्मिक + ठक्

(v) शिक्षिका कक्षामध्ये पाठयति ।

(क) शिक्षिका + तल्

(ख) शिक्षिका + त्व

(ग) शिक्षक + टाप्

**8.** मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत ।
मञ्जूषा में दिए गए शब्दों की सहायता से वाच्य परिवर्तन करते हुए निम्नलिखित संवाद को पुनः लिखिए ।
Rewrite the following dialogue changing the voice with the help of words given in the box. *1×3=3*

*रमा* – त्वं कुत्र गच्छसि ?

*सीता* – अहं तु आपणं (i) ____________ ।

*रमा* – तत्र (ii) ___________ किमर्थं गम्यते ।

*सीता* – अहं फलानि क्रेतुं गच्छामि ।

*रमा* – (iii) ____________ अपि ततः फलानि आनेतव्यानि ।

**मञ्जूषा**

| |
|---|
| मया, गच्छामि, त्वया । |

**अथवा (OR)**

अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत । (केवलं प्रश्नत्रयम्)
निम्नलिखित वाक्यों में वाच्य-परिवर्तन कीजिए । (केवल तीन प्रश्न)
Change the voice in the following sentences. (Only three questions) *1×3=3*

(i) रामः पाठं पठति ।

(ii) लतया पुष्पाणि चीयन्ते ।

(iii) अहं पत्रं लिखामि ।

(iv) गवा तृणानि भक्ष्यन्ते ।

(v) विद्या विनयं ददाति ।

**9.** अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूरयत । (केवलं प्रश्नचतुष्टयम्)
निम्नलिखित दिनचर्या में रिक्त स्थानों की पूर्ति कालबोधक शब्दों से कीजिए ।
(केवल चार प्रश्न)
Rewrite the daily routine using words in place of figures.
(Only four questions) *1×4=4*

(i) विकासः प्रातः 9:30 _________ वादने विद्यालयं गच्छति ।

(ii) सः नित्यं 7:15 _________ वादने भ्रमणाय गच्छति ।

(iii) गौरवः प्रातः 8:00 _________ वादने पूजां करोति ।

(iv) सुरभिः सायं 5:30 _________ वादने भ्रमति ।

(v) देवदत्तः रात्रौ 9:45 _________ वादने वार्तां शृणोति ।

**10.** अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयत ।

(केवलं प्रश्नषट्कम्)

निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए अव्यय पदों के द्वारा कीजिए ।

(केवल छः प्रश्न)

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box. (Only six questions) $\frac{1}{2} \times 6 = 3$

(i) रमा __________ अशोकनगरम् गमिष्यति ।

(ii) राजेन्द्रः __________ गृहं गतवान् ।

(iii) __________ वृष्टिः भवति ।

(iv) __________ विदधीत न क्रियाम् ।

(v) __________ मा वद ।

(vi) भवान् __________ किं करोति ?

(vii) सुरेशः तु __________ भ्रमति ।

(viii) रमेशः पुस्तकं लेखनीं __________ क्रीणाति ।

**मञ्जूषा**

| उच्चैः, च, श्वः, ह्यः, शनैः-शनैः, सहसा, इतस्ततः, इदानीम् । |
|---|

**11.** अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । शुद्धं पदं विकल्पेभ्यः चित्वा लिखत ।

(केवलं प्रश्नत्रयम्)

निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध हैं । शुद्ध पद विकल्प से चुनकर लिखिए ।

(केवल तीन प्रश्न)

Underlined words are incorrect in the following sentences. After selecting correct words from the options and write the same. (Only three questions)

$1 \times 3 = 3$

(i) सुरेशः नेत्रयोः पश्यति । (नेत्राभ्याम् / नेत्रेषु / नेत्रेभ्यः)

(ii) पाठ्यपुस्तके अष्ट पाठानि सन्ति । (पाठे / पाठाः / पाठान्)

(iii) ते बालिकाः विद्यालयं गच्छन्ति । (बालिके / बालकाः / बालकौ)

(iv) सुधा ह्यः आपणं गच्छामि । (गमिष्यामि / गच्छेयम् / अगच्छत्)

## खण्डः घ (SECTION D)

## पठित-अवबोधनम् (पठित-अवबोधन)

## Reading Comprehension

30 अङ्काः

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।
Read the following prose passage and answer the given questions in Sanskrit. *5*

अस्ति देउलाख्यो ग्रामः । तत्र राजसिंहः नाम राजपुत्रः वसति स्म । एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता । मार्गे गहनकानने सा एकं व्याघ्रं ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद — "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः ? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते ।"

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $\frac{1}{2}\times2=1$

(i) तत्र ग्रामे कः राजपुत्रः वसति स्म ?

(ii) बुद्धिमती कया पुत्रौ प्रहृतवती ?

(iii) मार्गे गहनकानने सा किं ददर्श ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question) *1×1=1*

(i) बुद्धिमती पुत्रौ चपेटया प्रहृत्य किं जगाद ?

(ii) बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता ?

(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Choose and write the appropriate answer from the given options. (Only three questions) *1×3=3*

(i) 'पत्नी' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(क) बुद्धिमती

(ख) भार्या

(ग) स्त्री

(ii) 'चलिता' इति क्रियापदस्य कर्तृपदं किम् ?

(क) बुद्धिमती

(ख) पुत्रौ

(ग) राजसिंहः

(iii) 'कानने' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?

(क) गहने

(ख) भयङ्करे

(ग) कानने

(iv) 'सा' इति पदस्य किं क्रियापदं गद्यांशे प्रयुक्तम् ?

(क) दृष्ट्वा

(ख) विभज्य

(ग) ददर्श

**13.** अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित पद्य को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।
Read the following poetry passage and answer the given questions in Sanskrit. *5*

शरीरायासजननं कर्म व्यायामसंज्ञितम् ।
तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः ।।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $\frac{1}{2}\times 2=1$

(i) शरीरायासजननं किं कुर्यात् ?

(ii) कीदृशं कर्म व्यायामसंज्ञितम् भवति ?

(iii) कस्य आयासजननं कर्म व्यायामः इति कथ्यते ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question) *1×1=1*

(i) किं कृत्वा तु सुखं देहं विमृद्नीयात् ?

(ii) समन्ततः किं कुर्यात् ?

(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Choose and write the appropriate answer from the given options. (Only three questions) *1×3=3*

(i) 'विमृद्नीयात्' इति क्रियापदस्य कर्तृपदं किं भवेत् ?
(क) जनः
(ख) कर्म
(ग) देहम्

(ii) 'सुखं देहम्' अनयोः पदयोः किं विशेष्यपदम् ?
(क) सुखम्
(ख) देहम्
(ग) व्यायामः

(iii) 'सर्वतः' इत्यस्य पदस्य कः पर्यायः श्लोके प्रयुक्तः ?
(क) अभितः
(ख) समन्ततः
(ग) उभयतः

(iv) 'दुःखम्' इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम् ?
(क) देहम्
(ख) जननम्
(ग) सुखम्

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।
Read the following drama passage and answer the given questions in Sanskrit. *5*

*वानरः –* (सगर्वम्) अत एव कथयामि यत् अहमेव योग्यः वनराजपदाय । शीघ्रमेव मम राज्याभिषेकाय तत्पराः भवन्तु सर्वे वन्यजीवाः ।

*मयूरः –* अरे वानर ! तूष्णीं भव । कथं त्वं योग्यः वनराजपदाय ? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः, अतः वने निवसन्तं माम् वनराजरूपेणापि द्रष्टुं सज्जाः भवन्तु अधुना यतः कथं कोऽप्यन्यः विधातुः निर्णयम् अन्यथा कर्तुं क्षमः ।

*काकः –* (सव्यङ्ग्यम्) अरे अहिभुक् ! नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम् ।

*मयूरः –* यतः मम नृत्यं तु प्रकृतेः आराधना । पश्य ! पश्य ! मम पिच्छानामपूर्वं सौन्दर्यम् (पिच्छानुद्घाट्य नृत्यमुद्रायां स्थितः सन्) न कोऽपि त्रैलोक्ये मत्सदृशः सुन्दरः । वन्यजन्तूनामुपरि आक्रमणं कर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि । अतः अहमेव योग्यः वनराजपदाय ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $\frac{1}{2} \times 2 = 1$

(i) 'अहमेव योग्यः वनराजपदाय' इति सगर्वं कः कथयति ?

(ii) मयूरं प्रति 'अहिभुक्' इति कः सम्बोधयति ?

(iii) मयूरस्य केषाम् अपूर्वं सौन्दर्यम् ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question) $1 \times 1 = 1$

(i) विधात्रा एव मयूरः कथं पक्षिराजः कृतः ?

(ii) कस्य नृत्यं प्रकृतेः आराधना ?

(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Choose and write the appropriate answer from the given options. (Only three questions) $1 \times 3 = 3$

(i) नाट्यांशे तत्पराः 'भवन्तु' अत्र क्रियायाः कर्तृपदं किम् प्रयुक्तम् ?

(क) वानरः

(ख) अहम्

(ग) वन्यजीवाः

(ii) 'अपूर्वं सौन्दर्यम्' इत्यत्र विशेष्यपदं किम् ?

(क) अपूर्वम्

(ख) सौन्दर्यम्

(ग) राजमुकुटम्

(iii) नाट्यांशे 'अधः' इत्यस्य किं विलोमपदं प्रयुक्तम् ?

(क) उपरि

(ख) अधुना

(ग) अन्यथा

(iv) 'उद्यताः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(क) तूष्णीम्

(ख) तत्पराः

(ग) शीघ्रम्

**15.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवलं प्रश्नचतुष्टयम्)
रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए । (केवल चार प्रश्न)
Frame the questions on the basis of underlined words.
(Only four questions) *1×4=4*

(i) <u>व्याघ्रं</u> दृष्ट्वा धूर्तः शृगालः अवदत् ।

(ii) <u>शरीरस्य</u> आयासजननं कर्म व्यायामः इति कथ्यते ।

(iii) सः <u>कृच्छ्रेण</u> भारम् उद्वहति ।

(iv) उभौ शवं <u>चत्वरे</u> स्थापितवन्तौ ।

(v) आत्मकल्याणम् इच्छन् नरः <u>परेषाम्</u> अनिष्टं न कुर्यात् ।

**16.** मञ्जूषत: समुचितपदानि चित्वा अधोलिखितश्लोकयो: अन्वयं पूरयत ।

मञ्जूषा में से समुचित पद चुनकर निम्नलिखित दोनों श्लोकों के अन्वय को पूर्ण कीजिए ।

Complete the prose order of the following two shlokas by choosing the appropriate words given in the box. $\frac{1}{2}\times4=2$

I. शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता ।
दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा ।।

**अन्वयः –**

(i) __________ कान्तिः गात्राणां (ii) __________ दीप्ताग्नित्वम् (iii) __________ स्थिरत्वं लाघवं (iv) __________ (भवन्ति) ।

II. य इच्छत्यात्यनः श्रेयः प्रभूतानि सुखानि च । $\frac{1}{2}\times4=2$
न कुर्यादहितं कर्म स परेभ्यः कदापि च ।।

**अन्वयः –**

यः (i) __________ श्रेयः प्रभूतानि सुखानि च (ii) __________ सः (iii) __________ कदापि च अहितम् (iv) __________ न कुर्यात् ।

**मञ्जूषा**

| इच्छति, आत्मनः, शरीरोपचयः, कर्म, अनालस्यम्, सुविभक्तता, मृजा, परेभ्यः |
|---|

**अथवा (OR)**

मञ्जूषायाः साहाय्येन प्रदत्तश्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत ।

मञ्जूषा की सहायता से श्लोक के भावार्थ में रिक्त स्थानों की पूर्ति करके पुनः लिखिए ।

Rewrite after filling the blanks in the meaning of Shlokas with the help of box. $1\times4=4$

संपत्तौ च विपत्तौ च महतामेकरूपता ।
उदये सविता रक्तो रक्तश्चास्तमये तथा ।।

**भावार्थः –**

इह लोके (i) __________ सम्पन्नतायां (ii) __________ चापि समरूपताम् भजन्ते । यथा सूर्यः (iii) __________ अपि रक्तवर्णः भवति (iv) __________ अपि रक्तवर्णः दृश्यते, अर्थात् सत्पुरुषाः विपत्तिकाले अपि खिन्नमनसः न जायन्ते ।

**मञ्जूषा**

| विपन्नतायाम्, उदयकाले, महापुरुषाः, अस्तकाले |
|---|

**17.** अधोलिखित-कथांशं समुचित-क्रमेण लिखत ।

निम्नलिखित कथांश को समुचित क्रम में लिखिए ।

Write in right order of the following parts of story. $\frac{1}{2}\times 8=4$

(i) विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति ।

(ii) वनस्य समीपे एवैका नदी वहति ।

(iii) एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति ।

(iv) क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति ।

(v) वानराः वृक्षोपरि स्थिताः हसन्ति ।

(vi) क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः ।

(vii) एवमेव वानराः वारं वारं सिंहं तुदन्ति ।

(viii) तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति ।

**18.** 'क' स्तम्भे लिखतानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति, तानि यथाक्रमेण समक्षं लिखत । (केवलं प्रश्नत्रयम्)

'क' स्तम्भ में लिखित पदों के पर्याय पद 'ख' स्तम्भ में लिखे गए हैं । उनको यथाक्रम से उनके समक्ष लिखिए । (केवल तीन प्रश्न)

Synonyms of the words of column 'Ka' have been given in column 'Kha'. Write in order in front of required words. (Only three questions) $1\times 3=3$

| *क* | *ख* |
|---|---|
| शत्रुः | अचिरम् |
| मित्रम् | वृषभः |
| बलीवर्दः | अरिः |
| शीघ्रम् | सुहृद् |

**अथवा (OR)**

अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थान् चित्वा लिखत ।

(केवलं प्रश्नत्रयम्)

निम्नलिखित वाक्यों में रेखांकित पदों के प्रसंगानुसार उचित अर्थ को चुनकर लिखिए ।

(केवल तीन प्रश्न)

Write the appropriate meaning after choosing the underlined words of the following sentences. (Only three questions) *1×3=3*

(i) गच्छ त्वमपि किञ्चित् गूढप्रदेशम् ।

(क) गुप्तप्रदेशम्

(ख) नगरम्

(ग) ग्रामम्

(ii) वयस्य, अपूर्वं खलु नामधेयम् ।

(क) वृद्ध !

(ख) पथिक !

(ग) मित्र !

(iii) अहं चन्दनदासम् इदानीं द्रष्टुमिच्छामि ।

(क) अचिरम्

(ख) अधुना

(ग) अकस्मात्

(iv) आर्य ! अलीकम् एतत् ।

(क) असत्यम्

(ख) सत्यम्

(ग) अचिरम्